चतुर्दशः पाठः

# शास्त्रकाराः

( भारते वर्षे शास्त्राणां महती परम्परा श्रूयते। शास्त्राणि प्रमाणभूतानि समस्तज्ञानस्य स्त्रोत:स्वरूपाणि सन्ति। अस्मिन् पाठे प्रमुखशास्त्राणां निर्देशपूर्वकं तत्प्रवर्तकानाञ्च निरूपणं विद्यते। मनोरञ्जनाय पाठेऽस्मिन् प्रश्नोत्तरशैली आसादिता वर्तते। )

( शिक्षकः कक्षायां प्रविशति, छात्राः सादरमुत्थाय तस्याभिवादनं कुर्वन्ति। )

**शिक्षकः-** उपविशन्तु सर्वे। अद्य युष्माकं परिचयः संस्कृतशास्त्रैः भविष्यति।

**युवराजः-** गुरुदेव ! शास्त्रं किं भवति ?

**शिक्षकः-** शास्त्रं नाम ज्ञानस्य शासकमस्ति। मानवानां कर्त्तव्याकर्तव्यविषयान् तत् शिक्षयति। शास्त्रमेव अधुना अध्ययनविषयः (Subject) कथ्यते, पाश्चात्यदेशेषु अनुशासनम् (Discipline) अपि अभिधीयते। तथापि शास्त्रस्य लक्षणं धर्मशास्त्रेषु इत्थं वर्तते -

प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा ।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते।

**अभिनवः-** अर्थात् शास्त्रं मानवेभ्यः कर्त्तव्यम् अकर्त्तव्यञ्च बोधयति। शास्त्रं नित्यं भवतु वेदरूपम्, अथवा कृतकं भवतु ऋष्यादिप्रणीतम्।

**शिक्षकः-** सम्यक् जानासि वत्स ! कृतकं शास्त्रं ऋषयः अन्ये विद्वांसः वा रचितवन्तः। सर्वप्रथमं षट् वेदाङ्गानि शास्त्राणि सन्ति। तानि - शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः ज्योतिषं चेति।

**इमरानः-** गुरुदेव ! एतेषां विषयाणां के-के प्रणेतारः ?

शिक्षकः- शृणुत यूयं सर्वे सावहितम्। शिक्षा उच्चारणप्रक्रियां बोधयति। पाणिनीयशिक्षा तस्याः प्रसिद्धो ग्रन्थः। कल्पः कर्मकाण्डग्रन्थः सूत्रात्मकः। बौधायन-भारद्वाज-गौतम-वसिष्ठादयः ऋषयः अस्य शास्त्रस्य रचयितारः। व्याकरणं तु पाणिनिकृतं प्रसिद्धम्। निरुक्तस्य कार्यं वेदार्थबोधः। तस्य रचयिता यास्कः। छन्दः पिङ्गलरचिते सूत्रग्रन्थे प्रारब्धम्। ज्योतिषं लगधरचितेन वेदाङ्गज्योतिषग्रन्थेन प्रावर्तत।

अब्राहमः- किमेतावन्तः एव शास्त्रकाराः सन्ति ?

शिक्षकः- नहि नहि। एते प्रवर्त्तकाः एव। वस्तुतः महती परम्परा एतेषां शास्त्राणां परवर्त्तिभिः सञ्चालिता। किञ्च, दर्शनशास्त्राणि षट् देशेऽस्मिन् उपक्रान्तानि।

श्रुतिः- आचार्यवर ! दर्शनानां के-के प्रवर्तकाः शास्त्रकाराः ?

शिक्षकः- सांख्यदर्शनस्य प्रवर्तकः कपिलः। योगदर्शनस्य पतञ्जलिः। एवं गौतमेन न्यायदर्शनं रचितं कणादेन च वैशेषिकदर्शनम्। जैमिनिना मीमांसादर्शनम्, बादरायणेन च वेदान्तदर्शनं प्रणीतम्। सर्वेषां शताधिकाः व्याख्यातारः स्वतन्त्रग्रन्थकाराश्च वर्तन्ते।

गार्गी- गुरुदेव ! भवान् वैज्ञानिकानि शास्त्राणि कथं न वदति ?

शिक्षकः- उक्तं कथयसि । प्राचीनभारते विज्ञानस्य विभिन्नशाखानां शास्त्राणि प्रावर्तन्त। आयुर्वेदशास्त्रे चकरसंहिता, सुश्रुतसंहिता चेति शास्त्रकारनाम्नैव प्रसिद्धे स्तः। तत्रैव रसायनविज्ञानम्, भौतिकविज्ञानञ्च अन्तरर्भू स्तः। ज्योतिषशास्त्रेऽपि खगोलविज्ञानं गणितम् इत्यादीनि शास्त्राणि सन्ति। आर्यभटस्य ग्रन्थः आर्यभटीयनामा प्रसिद्धः । एवं वराहमिहिरस्य बृहत्संहिता विशालो ग्रन्थः यत्र नाना विषयाः समन्विताः। वास्तुशास्त्रमपि अत्र व्यापकं शास्त्रमासीत्। कृषिविज्ञानं च पराशरेण रचितम्। वस्तुतो नास्ति शास्त्रकाराणाम् अल्पा संख्या।

वर्गनायकः- गुरुदेव ! अद्य बहुज्ञातम्। प्राचीनस्य भारतस्य गौरवं सर्वथा समृद्धम्।
(शिक्षकः वर्गात् निष्क्रामति। छात्राः अनुगच्छन्ति)

ABDIEL SOLUTIONS ABSOL PATNA

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| सादरम् | - | आदरेण सहितम् | - | आदर सहित |
| अभिवादनम् | - | नमस्कारः | - | अभिवादन, नमस्कार |
| उपविशन्तु | - | आसन्ताम् | - | बैठें |

| | | |
|---|---|---|
| गुरुदेव | आचार्य | गुरुदेव |
| धर्मशास्त्रेषु | धर्मस्याध्ययनं येषु-शास्त्रेषु वन्ति तेषु | धर्मशास्त्रों में |
| इत्थम् | एवम् | इस प्रकार |
| प्रवृत्तिः | अनुरक्ति | अविच्छिन्नता, सांसारिक विषयों में अनुरक्ति |
| निवृत्तिः | समाप्तिः | विरक्ति |
| कृतकेन | कृत्रिमेण | बनावटी, मानव-रचित |
| अभिधीयते | कथ्यते | कहा जाता है |
| बोधयति | ज्ञापयति | ज्ञापित कराता है, ज्ञान कराता है। |
| प्रणेतारः | लेखकाः | प्रणयन करने वाला, लेखक |
| सावहितम् | सावधानतया | सावधानीपूर्वक |
| प्रारब्धम् | आरब्धम् | आरम्भ किया हुआ, भाग्य |
| प्रवर्त्तकाः | संस्थापकाः | संस्थापक |
| उपक्रान्तानि | प्रवर्तितानि | आरम्भ हुए |
| प्रावर्तत | आरभत | आरम्भ हुआ |
| उपदिश्येत | अनुशास्येत | उपदेश दिया जाता है, सीख दी जाती है |

## व्याकरणम्

**(क) सन्धि-विच्छेदः**

पाठेऽस्मिन् - पाठे + अस्मिन्

प्रश्नोत्तरम् - प्रश्न + उत्तरम्

कर्त्तव्याकर्त्तव्यम् - कर्त्तव्य + अकर्त्तव्यम्

| | | |
|---|---|---|
| तथापि | - | तथा + अपि |
| प्रवृत्तिर्वा | - | प्रवृत्तिः + वा |
| येनोपदिश्येत | - | येन + उपदिश्येत |
| तच्छास्त्रम् | - | तत् + शास्त्रम् |
| अकर्त्तव्यञ्च | - | अकर्त्तव्यम् + च |
| ऋष्यादि | - | ऋषि + आदि |
| उच्चारण | - | उत् + चारणम् |
| देशेऽस्मिन् | - | देशे + अस्मिन् |
| शताधिकाः | - | शत + अधिकाः |
| ग्रन्थकाराश्च | - | ग्रन्थकाराः + च |
| चेति | - | च + इति |
| तत्रैव | - | तत्र + एव |
| इत्यादीनि | - | इति + आदीनि |
| नास्ति | - | न + अस्ति |

SOLUTIONS BSOL PATNA

**( ख ) समासः**

| | | | | |
|---|---|---|---|---|
| सादरम् | - | आदरेण युक्तम् | - | अव्ययीभावः |
| संस्कृतशास्त्रैः | - | संस्कृतस्य शास्त्रैः | - | षष्ठी तत्पुरुषः |
| वेदरूपम् | - | वेदः रूपम् यस्य | - | बहुव्रीहिः |
| सावहितम् | - | अवहितेन सहितम् | - | अव्ययीभावः |
| उच्चारणप्रक्रियाम् | - | उच्चारणस्य प्रक्रियायाम् | - | षष्ठी तत्पुरुषः |
| कर्मकाण्डग्रन्थः | - | कर्मकाण्डस्य ग्रन्थः | - | षष्ठी तत्पुरुषः |
| पाणिनिकृतम् | - | पाणिनिना कृतम् | - | तृतीया तत्पुरुषः |
| वेदार्थबोधः | - | वेदार्थस्य बोधः | - | षष्ठी तत्पुरुषः |
| आचार्यप्रवर | - | आचार्येषु प्रवर | - | सप्तमी तत्पुरुषः |

| | | | | |
|---|---|---|---|---|
| शताधिका: | – | शतात् अधिका: | – | पञ्चमी तत्पुरुष: |
| खगोलविज्ञानम् | – | खगोलस्य विज्ञानम् | – | षष्ठी तत्पुरुष: |
| कृषिविज्ञानम् | – | कृषे: विज्ञानम् | – | षष्ठी तत्पुरुष: |

## (ग) व्युत्पत्ति: (प्रकृति-प्रत्यय-विभाग:)

| | | |
|---|---|---|
| निरूपणम् | – | नि + सह् + णिच् + ल्युट् |
| उत्थाय | – | उत् + स्था + ल्यप् |
| अभिवादनम् | – | अभि + वद् + णिच् + ल्युट् |
| शासकम् | – | शास् + ण्वुल् |
| अनुशासनम् | – | अनु + शास् + ल्युट् |
| लक्षणम् | – | लक्ष् + ल्युट् |
| प्रवृत्ति: | – | प्र + वृत् + क्तिन् |
| निवृत्ति: | – | नि + वृत् + क्तिन् |
| कर्त्तव्यम् | – | कृ + तव्य |
| प्रणीतम् | – | प्र + नी + क्त |
| निरुक्तम् | – | निर् + वच् + क्त |
| कृतम् | – | कृ + क्त |
| प्रवर्तक: | – | प्र + वृत् + णिच् + ण्वुल् |
| दर्शनम् | – | दृश् + ल्युट् |
| प्रारब्धम् | – | प्र + आ + रभ् + क्त |
| विज्ञानम् | – | वि + ज्ञा + ल्युट् |
| रचितम् | – | रच् + क्त |
| आर्यभटीयम् | – | आर्यभट + छ |

## अभ्यासः
### ( मौखिकः )

1. **अधोलिखितानां प्रश्नानाम् उत्तरम् एकपदेन दत्त -**

(क) कक्षायां कः प्रविशति ?

(ख) के सादरमुत्थाय तस्याभिवादनं कुर्वन्ति ?

(ग) वेदस्य कति अङ्गानि भवन्ति ?

(घ) शिक्षा कां बोधयति ?

(ङ) पणिनिना कृतम् किं प्रसिद्धम् ?

2. **सन्धिविच्छेदं कुरुत -**

(क) उच्चारणम्

(ख) वेदार्थबोधः

(ग) व्युत्पत्तिः

(घ) निरुक्तम्

(ङ) प्रश्नोत्तरम्

3. **समासविग्रहं कुरुत-**

(क) ज्योतिषशास्त्रम् (ख) न्यायदर्शनम्

(ग) पाणिनिकृतम् (घ) पिङ्गलरचिते

4. **प्रकृति-प्रत्यय-विभागं कुरुत-**

(क) आर्यभटीयम् (ख) विज्ञानम्

(ग) रचितम् (घ) ज्ञातम्

(ङ) प्रवर्त्तकः

ABDIEL SOLUTIONS ABSOL * PATNA *

5. विपरीतार्थकान् शब्दान् वदत -

(क) उत्थाय

(ख) शासकम्

(ग) कर्त्तव्यम्

(घ) अस्ति

(ङ) उच्चैः

(च) चरः

(छ) गमनम्।

## अभ्यासः

## ( लिखितः )

1. अधोलिखितानां पदानाम् उत्तराणि संस्कृतभाषया लिखत -

(क) संस्कृतशास्त्रैः सह केषां परिचयो भविष्यति ?

(ख) शास्त्रस्य लक्षणं गुरुणा किं प्रोक्तम् ?

(ग) धर्मशास्त्रे शास्त्रस्य किं लक्षणं प्रोक्तम् ?

(घ) वेदरूपं शास्त्रं किं भवति ?

(ङ) ऋष्यादिभिः प्रणीतं किं भवति ?

(च) कति वेदाङ्गानि सन्ति ?

(छ) वेदाङ्गानां नामानि लिखत ?

(ज) केन कृतं व्याकरणं प्रसिद्धम् ?

(झ) कपिलः कस्य दर्शनस्य प्रवर्तकः आसीत् ?

2. अधोलिखितवाक्येषु रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत-

यथा - उत्तर - पराशरेण मुनिना कृषिविज्ञानं प्रवर्तितम्।

प्रश्नः - केन मुनिना कृषिविज्ञानं प्रवर्तितम् ?

(क) भारतवर्षे <u>शास्त्राणां</u> महती परम्परा श्रूयते।

(ख) अद्य <u>युष्माकं</u> परिचयः संस्कृतशास्त्रैः भविष्यति।

(ग) <u>शास्त्रं</u> मानवेभ्यः कर्त्तव्यम् अकर्त्तव्यञ्च बोधयति।

(घ) शास्त्रं <u>नित्यं</u> भवति वेदरूपम्।

(ङ) ऋष्यादिप्रणीतम् कृतकं भवति।

(च) जैमिनिना मीमांसादर्शनं प्रणीतम्।

(छ) सर्वेषां शताधिकाः व्याख्यातारः स्वतन्त्रग्रन्थकाराश्च वर्तन्ते।

3. **अधोलिखितक्रियापदानां स्ववाक्येषु प्रयोगं कुरुत -**

(क) भवति (ख) प्रणीतम् (ग) प्रवर्त्तकाः (घ) वर्तन्ते

(ङ) वदति (च) कथयसि (छ) अल्पा।

4. **कोष्ठान्तर्गतानां शब्दानां साहाय्येन रिक्तस्थानानि पूरयत -**

(प्रविशति, महती, सादरमुत्थाय, युष्माकम्, मानवेभ्यः, तत्रैव, नास्ति।)

(क) भारतवर्षे शास्त्राणां .................... परम्परा श्रूयते।

(ख) शिक्षकः कक्षायां ....................।

(ग) छात्राः .................... तस्याभिवादनं कुर्वन्ति।

(घ) अद्य .................... परिचयः संस्कृतशास्त्रैः भविष्यति।

(ङ) शास्त्रं .................... कर्त्तव्यम् अकर्त्तव्यञ्च बोधयति।

(च) .................... रसायनविज्ञानम्, भौतिकविज्ञानञ्च-अन्तरर्भू स्तः।

(छ) वस्तुतो .................... शास्त्रकाराणाम् अल्पा संख्या।

5. **रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं लिखत -**

(क) उपविशन्तु सर्वे।

(ख) अद्य युष्माकं परिचयः संस्कृतशास्त्रैः भविष्यति।

(ग) कृतकं शास्त्रं ऋषयः अन्ये विद्वांसः वा रचितवन्तः।

(घ) पाणिनीयशिक्षा तस्याः प्रसिद्धो ग्रन्थः।

(ङ) सर्वेषां शताधिकाः व्याख्यातारः स्वतन्त्रग्रन्थकाराश्च वर्तन्ते।

(च) प्राचीनभारते विज्ञानस्य विभिन्नशाखानां शास्त्राणि प्रावर्तन्त।

(छ) वराहमिहिरस्य बृहत्संहिता विशालो ग्रन्थः यत्र नाना विषयाः समन्विताः।

ABDIEL SOLUTIONS ABSOL PATNA

## योग्यताविस्तारः

(प्रस्तुतपाठः भारतीयशास्त्रकाराणां संक्षिप्तं परिचयं प्रस्तौति। भारतस्य पुण्यभूमिः शास्त्रकाराणां मातृका वर्तते। वेदाङ्गानां, दर्शनानां, विज्ञानानां, साहित्य-व्याकरणादिशास्त्राणां महती शास्त्रपरम्परा वर्तते। धर्मशास्त्रस्य, अर्थशास्त्रस्य, कामशास्त्रस्य, तन्त्रशास्त्रस्य च सुदीर्घा परम्परा चापि अवलोक्यते।)

## करणीयं कार्यम्

1. संस्कृतशिक्षकाणां समीपवर्तिनां संस्कृतविदुषां च सहयोगेन विविधशास्त्रकाराणां सूची निर्मातव्या। तत्र शास्त्रकारनाम-शास्त्रनाम-प्रतिपाद्यविषयरचनाकालादितथ्यानि संकेतरूपेण स्पष्टतया लेखनीयानि सन्ति।

2. विहारप्रदेशः शास्त्रकाराणाम् उर्वरभूमिरूपेण आदिकालतः विख्यातः अस्ति। विदेहराजस्य जनकस्य राजसभा वस्तुतः शास्त्रसभा एव आसीत्। यतो हि सम्पूर्णभारतीयवैदिकदर्शनस्य व्यावहारिकं पक्षं स्वीकृत्य जीवनं यापयन् मिथिलेशः जनकः दृश्यते। इदमेव कारणं यत् स विदेह इत्युच्यते। अत्र अष्टावक्रादीनां शास्त्रचर्चा प्रसिद्धा वर्तते। एतत्सम्बद्धकथाः छात्राः संस्कृतशिक्षकसहयोगेन जानीयुः।

3. विहारे पुरुषार्थचतुष्टयस्य प्रतिपादकानां शास्त्राणां प्रवर्तकानां पुण्यभूमिः विद्यते। यथा–

   (क) धर्मशास्त्रस्य कृते याज्ञवल्क्यस्मृतिः

   (ख) अर्थशास्त्रस्य कृते कौटिलीयमर्थशास्त्रम्

   (ग) कामशास्त्रस्य कृते वात्स्यायनकामसूत्रम्

   (घ) मोक्षशास्त्रस्य कृते गौतमस्य न्यायसूत्रम्, कणादस्य वैशेषिकसूत्रम्, कपिलस्य सांख्यसूत्रम्, जैमिनेः मीमांसासूत्रम् च प्रमुखानि शास्त्राणि सन्ति।

   (ङ) विहारस्य शास्त्रनिर्माणक्षेत्रे महद् योगदानं वर्तते। विशेषतः नव्यन्यायस्य। तन्त्रस्य च क्षेत्रे। तत्र गङ्गेशोपाध्यायादीनां नामानि प्रसिद्धानि।